# Uchchishtaganesha Sahasranamastotram 2

# ઉચ્છિષ્ટગણેશસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : shrIuchChiShTagaNapatisahasranAmastotram 2

File name : uchChiShTagaNapatisahasranAmastotram2.itx

Category : sahasranAma, ganesha

Location : doc_ganesha

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description-comments : RudrayAmalatantra, mantramahArNava

Latest update : October 10, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 16, 2025

*sanskritdocuments.org*

# ઉચ્છિષ્ટગણેશસહસ્રનામસ્તોત્રમ્ ૨

(રુદ્રયામલતન્ત્રોક્તમ્ , મન્ત્રમહાર્ણવાન્તર્ગતમ્)
શ્રીભૈરવ ઉવાચ ।
શૃણુ દેવિ રહસ્યં મે યત્પુરા સૂચિતં મયા ।
તવ ભક્ત્યા ગણેશસ્ય વક્ષ્યે નામસહસ્રકમ્ ॥ ૧॥

દેવ્યુવાચ ।
ૐ ભગવન્ગણનાથસ્થ ઉચ્છિષ્ટસ્ય મહાત્મનઃ ।
શ્રોતું નામસહસ્રં મે હૃદયં ચોત્સુકાયતે ॥ ૨॥

ભૈરવ ઉવાચ ।
પ્રાઙ્મુખ ત્રિપુરાનાથે જાતવિઘ્નાકુલે શિવે ।
મોહને મુચ્યતે ચેતસ્તે સવે બલદર્પિતાઃ ॥ ૩॥

તદા પ્રભું ગણાધ્યક્ષં સ્તુત્વા નામસહસ્રકમ્ ।
વિઘ્ના દૂરાત્યપલાયતે કાલરુદ્રાદિવ પ્રજાઃ ॥ ૪॥

તસ્યાનુગ્રહતો દેવિ જાતોઽહં ત્રિપુરાન્તકઃ ।
તમદ્યાપિ ગણેશાનં સ્તાત્રં નામસહસ્રકૈઃ ॥ ૫॥

તમેવ તવ ભક્ત્યાહં સાધકાનાં હિતાય ચ ।
મહાગણપતેર્વક્ષ્યે દિવ્યં નામસહસ્રકમ્ ॥ ૬॥

ૐ અસ્ય શ્રીઉચ્છિષ્ટગણેશસહસ્રનામસ્તોત્રમન્ત્રસ્ય શ્રીભૈરવ ઋષિઃ ।
ગાયત્રી છન્દઃ । શ્રીમહાગણપતિર્દેવતા ।
ગં બીજમ્ । હ્રીં શક્તિઃ । કુરુકુરુ કીલકમ્ ।
મમ ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।
ૐ હ્રીં શ્રીં શ્રીગણાધ્યક્ષો ગ્લૌં ગં ગણપતિર્ગુણી ।
ગુણાઢ્યો નિર્ગુણો ગોપ્તા ગજવક્ત્રો વિભાવસુઃ ॥ ૭॥

વિશ્વેશ્વરો વિભાદીપ્તો દીપનો ધીવરો ધની ।

સદાશાન્તો જગત્ત્રાતા વિશ્વાવર્તો વિભાકરઃ ॥ ૮॥

વિશ્રમ્ભી વિજયો વૈદ્યો વારાન્નિધિરનુત્તમઃ ।
અણિમાવિભવઃ શ્રેષ્ઠો જ્યેષ્ઠો ગાથાપ્રિયો ગુરુઃ ॥ ૯॥

સૃષ્ટિકર્તા જગદ્ધર્તા વિશ્વભર્તા જગન્નિધિઃ ।
પતિઃ પીતવિભૂષાઙ્ગો રક્તાસ્યો લોહિતામ્બરઃ ॥ ૧૦॥

દ્વિપાક્ષોચ્ચવિમાનસ્થો વિનયઃ સદયઃ સુખી ।
સુરૂપઃ સાત્ત્વિકઃ સત્યઃ શુદ્ધઃ શઙ્કરનન્દનઃ ॥ ૧૧॥

નન્દીશ્વરો જયાનન્દી બન્ધસ્તુત્યો વિચક્ષણઃ ।
દૈત્યમર્દી સદાક્ષીવો મદિરારુણલોચનઃ ॥ ૧૨॥

સરાત્મા વિશ્વાસારશ્ચ વિશ્વધારો વિલેપનઃ ।
પરં બ્રહ્મ પરં જ્યોતિઃ સાક્ષી ત્ર્યક્ષો ત્રિકસ્થિતઃ ॥ ૧૩॥

વિશ્વેશ્વરો વીરહર્તા સૌભાગ્યો ભાગ્યવર્દ્ધનઃ ।
ભૃઙ્ગીરિટી ભૃઙ્ગમાલી ભૃઙ્ગકૂજિતનાદિતઃ ॥ ૧૪॥

વિવર્તકો વિનીતોઽપિ નયનાનન્દનાર્ચિતઃ ।
ગઙ્ગાજલપાનપ્રિયો ગઙ્ગાતીરવિહારણઃ ॥ ૧૫॥

ગઙ્ગાપ્રિયો ગઙ્ગજશ્ચ વાહનાનિ પુરઃ સદા ।
ગન્ધમાદનસંવાસો ગન્ધમાદનકેલિકૃત ॥ ૧૬॥

ગન્ધાનુલિપ્તપૂર્વાઙ્ગઃ સર્વદેવસ્મરઃ સદા ।
ગન્ધર્વગણરાજેશો ગન્ધર્વગણસેવિતઃ ॥ ૧૭॥

ગન્ધર્વપૂજિતો નિત્યં સર્વરોગવિનાશકઃ ।
ગન્ધર્વગણસંસેવ્યો ગન્ધર્વવરદાયકઃ ॥ ૧૮॥

ગન્ધર્વો ગન્ધમાતઙ્ગો ગન્ધર્વકુલદૈવતઃ ।
ગન્ધર્વગર્વસંવેગો ગન્ધર્વવરદાયકઃ ॥ ૧૯॥

ગન્ધર્વપ્રવલાઃ સત્વં ગન્ધર્વગણસંયુતઃ ।
ગન્ધર્વાદિગુણાનન્દો નન્દોઽનન્તગુણાત્મકઃ ॥ ૨૦॥

વિશ્વમૂર્તિર્વિશ્વધાતા વિનતાસ્યો વિનર્તકઃ ।
કરાલઃ કામદઃ કાન્તઃ કમનીયઃ કલાનિધિઃ ॥ ૨૧॥

કારુણ્યરૂપઃ કુટિલઃ કુલાચારી કુલેશ્વરઃ ।
વિકરાલો રણઃ શ્રેષ્ઠઃ સંહારો હારભૂષણઃ ॥ ૨૨॥

ઊરૂરમ્યમુખો રક્તો દેવતાદયિતો રસઃ ।
મહાકાલો મહાદંષ્ટ્રો મહોરગભયાનકઃ ॥ ૨૩॥

ઉન્મત્તરૂપઃ કાલાગ્નિરગ્નિસૂર્યેન્દુલોચનઃ ।
સિતાસ્યશ્ચાસિતાત્મા ભૈરવસૌભાગ્યવાન્ભગઃ ॥ ૨૪॥

ભર્ગાત્મજો ભગાવાસો ભગદો ભગવર્દ્ધનઃ ।
શુભઙ્કરઃ શુચિઃ શાન્તઃ શ્રેષ્ઠઃ શ્રવ્યઃ શચીપતિઃ ॥ ૨૫॥

વેદાદ્યો વેદકર્તા ચ વેદવેદ્યઃ સનાતનઃ ।
વિદ્યાપ્રદો વેદરસો વૈદિકો વેદપારગઃ ॥ ૨૬॥

વેદધ્વનિરતો વીરો વેદવેદાઙ્ગસ્વર્થવિત્ ।
તત્વજ્ઞઃ સર્વગઃ સાધુઃ સદયઃ સદસન્મયઃ ॥ ૨૭॥

શિવઙ્કરઃ શિવસુતઃ શિવાનન્દવિવર્દ્ધનઃ ।
સૈન્યઃ શ્વેતઃ શતમુખો મુગ્ધો મોદકભઞ્જનઃ ॥ ૨૮॥

દેવદેવો દિનકરો ધૃતિમાન્દ્યુતિમાન્ધનઃ ।
શુદ્ધાત્મા શુદ્ધમતિમાઞ્શુદ્ધદીપતિઃ શુચિવ્રતઃ ॥ ૨૯॥

શરણ્યઃ શૌનકઃ શૂરઃ શબ્દદમ્ભી જટોરુકઃ ।
દારકઃ શિખિવાહેષ્ટઃ સિતઃ શઙ્કરવલ્લભઃ ॥ ૩૦॥

શઙ્કરો નિર્ભયો નિત્યો લયકૃલ્લાસ્યતત્પરઃ ।
લૂતો લીલારસોલ્લાસી વિલાસી વિભ્રમો ભ્રમઃ ॥ ૩૧॥

ભ્રમણઃ શશિભૃત્સૂર્યઃ શનિર્ધરણિનન્દનઃ ।
બુધો વિબુધસેવ્યશ્ચ બુધરાજો બલન્ધરઃ ॥ ૩૨॥

જીવો જીવપ્રદો જેતા સ્તુત્યો નિત્યો રતિપ્રિયઃ ।
કવિઃ કાવ્યાર્થકુશલો જનરક્ષણતત્પરઃ ॥ ૩૩॥

જનાનન્દપ્રદાતા ચ જનકાહ્લાદકારકઃ ।
ગચ્છો ગણપતિર્ગચ્છનાયકો ગચ્છગર્વહા ॥ ૩૪॥

ગચ્છરાજોઽથ ગચ્છેશો ગચ્છરાજનમસ્કૃતઃ ।
ગચ્છપ્રિયો ગચ્છગુરુર્ગચ્છત્રાકૃદ્યમાતુરઃ ॥ ૩૫॥

ગચ્છપ્રભુર્ગચ્છચરો ગચ્છપ્રિયકૃતોદ્યમઃ ।
ગચ્છગીતગુણો ગર્તો મર્યાદાપ્રતિપાલકઃ ॥ ૩૬॥

ગીર્વાણાગમસારશ્ચ નભો ગીર્વાણદેવતા ।
સમ્પત્તિસદનાકારઃ સમ્પત્તિસુખદાયકઃ ॥ ૩૭॥

સમ્પત્તિસુખકર્તા ચ સમ્પત્તિસુભગાનનઃ ।
સમ્પત્તિશુભદો નિત્યં સમ્પત્તિશ્ચ તપોધનઃ ॥ ૩૮॥

રુચકો મેચકસ્તુષ્ટઃ પ્રભુસ્તોમરઘાતકઃ ।
દણ્ડી ચણ્ડાંશુરવ્યક્તઃ કમણ્ડલુધરોઽનઘઃ ॥ ૩૯॥

કામી કર્મરતઃ કાલકોલઃ ક્રન્દિતદિક્તટઃ ।
ભ્રામકો જાતિપૂજ્યશ્ચ જાડ્યહા જડસૂદનઃ ॥ ૪૦॥

જાલન્ધરો જગદ્વાસી હાસકૃદ્ગહનો ગુહઃ ।
હવિષ્માન્હવ્યવાહાક્ષો હાટકો હાટકાઙ્ગદઃ ॥ ૪૧॥

સુમેરુર્હિમવાન્હોતા હરપુત્રો હલાઙ્કુપઃ ।
હાલાપ્રિયો હૃદા શાન્તઃ કાન્તાહૃદયપોષણઃ ॥। ૪૨॥

શોષણઃ ક્લેશહા ક્રૂરઃ કુબેરઃ કવિતાકૃતિઃ ।
કુબેરો ધીમયો ધાતા ધ્યેયો ધીમાન્દયાનિધિઃ ॥ ૪૩॥

દવિષ્ઠો દમનો હૃષ્ટો દાતા ત્રાતા સિતાસમઃ ।
નિર્ગતો નૈગમો ગમ્યો નિર્જયો જટિલોઽજરઃ ॥ ૪૪॥

જનજીવો જિતારાતિર્જગદ્વ્યાપી જગન્મયઃ ।
ચામીકરનિભો નાભ્યો નલિનાયતલોચનઃ ॥ ૪૫॥

રોચનામોચકો મન્ત્રી મન્ત્રકોટિસમાશ્રિતઃ ।
પઞ્ચભૂતાત્મકઃ પઞ્ચસાયકઃ પઞ્ચવક્ત્રકઃ ॥ ૪૬॥

પઞ્ચમઃ પશ્ચિમઃ પૂર્વઃ પૂર્ણઃ કીર્ણાલકઃ કુણિઃ ।
કઠોરહૃદયગ્રીવોઽલઙ્કૃતો લલિતાશયઃ ॥ ૪૭॥

લોલચિત્તો બૃહન્નાસો માસપક્ષર્તુરૂપવાન્ ।
ધ્રુવો દ્રુતગતિર્બન્ધો ધર્મવાન્કિંપ્રિયો નલઃ ॥ ૪૮॥

અગસ્ત્યગ્રસ્તભુવનો ભુવનૈકમલાપહઃ ।

સાગરઃ સ્વર્ગતિઃ સ્વક્ષઃ સાનન્દઃ સાધુપૂજિતઃ ॥ ૪૯॥

સતીપતિઃ સમરસઃ સનકઃ સરલઃ સરઃ ।
સુરપ્રિયો વસુમતિર્વાસવો વસુપૂજિતઃ ॥ ૫૦॥

વિત્તદો વિત્તનાથશ્ચ ધનિનાં ધનદાયકઃ ।
રાજીવનયનઃ સ્મર્તા સ્મૃતિહા કૃત્તિકામ્બરઃ ॥ ૫૧॥

અશ્વિનોઽશ્વિમુખઃ શુભ્રો ભરણો ભરણીપ્રિયઃ ।
કૃત્તિકાસનકઃ કોલો રોહિણી રોહિણોપમઃ ॥ ૫૨॥

ક્રતવોષ્ટોરિમન્દી ચ રોહિણીમોહિનીભૃતઃ ।
મૃગરાજો મૃગશિરો માધવો મધુરધ્વનિઃ ॥ ૫૩॥

આર્દ્રાનલો મહાબુદ્ધિર્મહોરગવિભૂષણઃ ।
ભ્રૂક્ષેપદન્તવિભવો ભ્રૂકરાલઃ પુનર્નવઃ ॥ ૫૪॥

પુનર્દેવઃ પુનર્જેતા પુનર્જીવઃ પુનર્વસુઃ ।
તિમિરસ્તિમિકેતુશ્ચ તિમિવાસરઘાતનઃ ॥ ૫૫॥

તિષ્યસ્તુલાધરો જૃમ્ભો વિશ્લેષાશ્લેષદાનરાટ્ ।
માનવો માધવો માઘો વાચાલો મઘવા યમઃ ॥ ૫૬॥

મઘો મઘાપ્રિયો મેઘો મહાશુણ્ડો મહાભુજઃ ।
પૂર્વાફાલ્ગુનિકઃ પ્રીતઃ ફલ્ગુરુત્તરફાલ્ગુનઃ ॥ ૫૭॥

ફેનિલો બ્રહ્મદો બ્રહ્મા સપ્તતન્તુસમાશ્રયઃ ।
ઘોણાહસ્તશ્ચતુર્હસ્તો હસ્તિવક્ત્રો હલાયુધઃ ॥ ૫૮॥

ચિત્રામ્બરોઽર્ચિતપદઃ સ્વસ્તિદઃ સ્વસ્તિવિગ્રહઃ ।
વિશાખાશિખિસેવ્યશ્ચ શિખિધ્વજસહોદરઃ ॥ ૫૯॥

અણૂરેણૂકરસ્કારો રૂરૂરેણૂ સુતીનરઃ ।
અનૂરાધાપ્રિયો રાધઃ શ્રીમાઞ્છુક્લઃ શુચિસ્મિતઃ ॥ ૬૦॥

જ્યેષ્ઠઃ શ્રેષ્ઠાર્ચિતપદો મૂલં ત્રિજગતો ગુરુઃ ।
શુચિઃ પૂર્વોત્તરાષાઢશ્ચોત્તરાષાઢ ઈશ્વરઃ ॥ ૬૧॥

શ્રવ્યોઽભિજિદનન્તાત્મા શ્રવશ્ચેષ્ટિતદાનવઃ ।
શ્રાવણઃ સ્રાવણઃ શ્રોતા ધની ધન્યો ધનપ્રદઃ ॥ ૬૨॥

ધનેચ્છુકઃ સદાતીવ્રઃ શીતકુમ્ભઃ શરદ્દ્યુતિઃ ।
પૂર્વાભાદ્રપદાભાદ્રશ્ચોત્તરાભાદ્રપાદિતઃ ॥ ૬૩॥

રેણુકસ્તનયો રામો રેવતીરમણો રમી ।
અશ્વયુક્કાર્તિકેયેષ્ટો માર્ગશીર્ષો મૃગોત્તમઃ ॥ ૬૪॥

પૌષૈશ્વર્યઃ ફાલ્ગુનાત્મા વસન્તશ્ચિત્રકો મધુઃ ।
રાજ્યદોઽભિજિદાત્મીયસ્તારેશસ્તારકદ્યુતિઃ ॥ ૬૫॥

પ્રતીતઃ પ્રોર્જિતઃ પ્રીતઃ પરમઃ પરમો હિતઃ ।
પરહા પઞ્ચભૂઃ પઞ્ચવાયુપૂજ્યઃ પરો મહઃ ॥ ૬૬॥

પુરાણાગમવિદ્યોગી મહિષો રાસભોઽગ્રગઃ ।
ગ્રહો મેષો વૃષો મન્દો મન્મથો મિથુનાકૃતિઃ ॥ ૬૭॥

કલ્પભૃત્કણ્ટકટકો દીપો મર્કટેશપ્રભુઃ ।
કર્કટો ઘૃણિકુક્કૂટો વનજો હંસયોહસઃ ॥ ૬૮॥

સિંહસિંહાસનો ભૂષ્યો મુહુર્મૂષકવાહનઃ ।
કન્યાકલાવતીપુત્રો કન્યાપ્રીતઃ કુલોદ્વહઃ ॥ ૬૯॥

અતુલ્યરૂપો બલદસ્તુલ્યભૃત્તુલ્યસાક્ષિકઃ ।
અલિશ્ચાપધરો ધન્વી કચ્છપો મકરો મણિઃ ॥ ૭૦॥

કુમ્ભભૃત્કલશઃ કુબ્જી મીનમાંસસુતર્પિતઃ ।
રાશિતારાગ્રહમયસ્તિથિરૂપો જગદ્વિભુઃ ॥ ૭૧॥

પ્રતાપી પ્રતિપત્પ્રેયો દ્વિતીયાદ્વૈતનિશ્ચિતઃ ।
ત્રિરુપશ્ચ તૃતીયાગ્નિસ્ત્રયીરૂપસ્ત્રયીતનુઃ ॥ ૭૨॥

ચતુર્થીવલ્લભો દેવો પરાગઃ પઞ્ચમીશ્વરઃ ।
ષડ્રસાસ્વાદકો જાતઃ ષષ્ઠી ષષ્ઠીકવત્સલઃ ॥ ૭૩॥

સપ્તાર્ણવગતિઃ સારઃ સપ્તમીશ્વરરોહિતઃ ।
અષ્ટમીનન્દનોઽનન્તો નવમીભક્તિભાવિતઃ ॥ ૭૪॥

દશદિક્પતિપૂજ્યશ્ચ દશમીદ્રુહિણો દ્રુતઃ ।
એકાદશાત્મગણપો દ્વાદશીયુગચર્ચિતઃ ॥ ૭૫॥

ત્રયોદશમણિસ્તુત્યશ્ચતુર્દશસ્વરપ્રિયઃ ।
ચતુર્દશેન્દ્રસંસ્તુત્યઃ પૂર્ણિમાનન્દવિગ્રહઃ ॥ ૭૬॥

દર્શાદર્શૌ દર્શગશ્ચ વાનપ્રસ્થો મહેશ્વરઃ ।
મૌર્વી મધુરવાગ્મૂલં મૂર્તિમાન્મેઘવાહનઃ ॥ ૭૭॥

મહાગજો જિતક્રોધો જિતશત્રુર્જયાશ્રયઃ ।
રૌદ્રો રુદ્રપ્રિયો રુદ્રો રુદ્રપુત્રોઽઘનાશનઃ ॥ ૭૮॥

ભવપ્રિયો ભવાનીષ્ટો ભારભૃદ્ભૂતભાવનઃ ।
ગન્ધર્વકુશલઃ કુણ્ઠો વૈકુણ્ઠોઽભીષ્ટસેવિતઃ ॥ ૭૯॥

વૃત્રહા વિઘ્નહા સીરઃ સમસ્તદુરિતાપહા ।
મઞ્જુરો માર્જરો મત્તો દુર્ગાપુત્રો દુરાલસઃ ॥ ૮૦॥

અનન્તચિત્સુધાધારો વીરવીર્યૈકસાધકઃ ।
ભાસ્વન્મુકુટમાણિક્યઃ કૂજત્કિઙ્કિણિજાલકઃ ॥ ૮૧॥

શુણ્ડાધારી તુણ્ડચલઃ કુણ્ડલી મુણ્ડમાલકઃ ।
પદ્માક્ષઃ પદ્મહસ્તશ્ચ પદ્મનાભસમર્ચિતઃ ॥ ૮૨॥

ઉદિતારુણદન્તાસ્યો માલાભૂષણભૂષિતઃ ।
નારદો વારણો લોલશ્રવણઃ શૂર્પકર્ણકઃ ॥ ૮૩॥

બૃહદુલ્લાસનાસાઢ્યો વ્યાપ્તત્રૈલોક્યમણ્ડલઃ ।
રત્નમણ્ડલાસીનઃ કૃશાનુરૂપશીલકઃ ॥ ૮૪॥

બૃહત્કર્ણાઞ્ચલોદ્ભૂતવાયુવીજિતદિક્પટઃ ।
બૃહદાસ્યરવાક્રાન્તો ભીમબ્રહ્માણ્ડભાણ્ડકઃ ॥ ૮૫॥

બૃહત્પાદસમાક્રાન્તઃ સપ્તપાતાલદીપિતઃ ।
બૃહદ્દન્તકૃતાત્યુગ્રરણાનન્દરસાલસઃ ॥ ૮૬॥

બૃહદ્ધસ્તધૃતાશેષાયુધનિર્જિતદાનવઃ ।
સ્ફુરત્સિન્દૂરવદનઃ સ્ફુરત્તેજોઽગ્નિલોચનઃ ॥ ૮૭॥

ઉદ્દીપિતમણિસ્ફૂર્જન્નૂપુરધ્વનિનાદિતઃ ।
ચલતોયપ્રવાહાઢ્યો નદીજલકણાકરઃ ॥ ૮૮॥

ભ્રમત્કુઞ્જરસઙ્ઘાતવન્દિતાઙ્ઘ્રિશિરોરુહઃ ।
બ્રહ્માચ્યુતમહારુદ્રપુરઃસરસુરાર્ચિતઃ ॥ ૮૯॥

અશેષશેષપ્રભૃતિવ્યાલજાલોપસેવિતઃ ।

ગર્જત્પઞ્ચાનનારાવપ્રસાદિતધરાતલઃ ॥ ૯૦॥

હાહાહૂહૂગતાત્યુગ્રસ્વરવિભ્રાન્તમાનસઃ ।
પઞ્ચાશદ્વર્ણબીજાઢ્યો મન્ત્રી મન્ત્રિતવિગ્રહઃ ॥ ૯૧॥

વેદાન્તશાસ્ત્રપીયૂષધારાપ્લાવિતભૂતલઃ ।
શઙ્ખધ્વનિસમાક્રાન્તપાતાલાદિનભસ્તલઃ ॥ ૯૨॥

ચિન્તામણિર્મહામલ્લો બલ્લહસ્તો બલિઃ કવિઃ ।
કૃતત્રેતાયુગોલ્લાસભાસમાનજગત્ત્રયઃ ॥ ૯૩॥

દ્વાપરઃ પરલોકૈકઃ કર્મધ્વાન્તસુધાકરઃ ।
સુધાસિક્તવપુર્વ્યાસો બ્રહ્માણ્ડાદિકબાહુકઃ ॥ ૯૪॥

અકારાદિક્ષકારાન્તવર્ણપઙ્ક્તિસમુજ્જ્વલઃ ।
અકારાકારમોદ્ગીતતાનનાદનિનાદિતઃ ॥ ૯૫॥

ઇકારેકારમન્ત્રાઢ્યો માલાભરણલાલસઃ ।
ઉકારોકારમોહારિર્ઘોરનાગોપવીતકઃ ॥ ૯૬॥

ઋવર્ણાઙ્કિત ૠકારપદ્માલયસમુજ્જવલઃ ।
લૃકારયુતલૄકારશઙ્ખપૂર્ણદિગન્તરઃ ॥ ૯૭॥

એકારૈકારગિરિજાસ્તનપાનવિચક્ષણઃ ।
ઓકારૌકારવિશ્વાદિકૃતસૃષ્ટિક્રમાલસઃ ॥ ૯૮॥

અંઓવર્ણાવલીવ્યાપ્તપાદાદિશીર્ષમણ્ડલઃ ।
કર્ણતાલકૃતાત્યુચ્ચૈર્વાયુવીજિતનિર્જરઃ ॥ ૯૯॥

ખગેશધ્વજરત્નાઙ્કઃ કિરીટારુણપાદકઃ ।
ગર્વિતાશેષગન્ધર્વ્વગીતતત્પરશ્રોતૃકઃ ॥ ૧૦૦॥

ઘનવાહનવાગીશપુરઃસરસુરાર્ચિતઃ ।
ઙવર્ણામૃતવારાઢ્યસોમમાનૈકદન્તકઃ ॥ ૧૦૧॥

ચન્દ્રકુઙ્કુમજમ્બાલલિપ્તસિન્દૂરવિગ્રહઃ ।
છત્રચામરરત્નાઢ્યમુકુટાલઙ્કૃતાનનઃ ॥ ૧૦૨॥

જટાબદ્ધમહાનર્ઘમણિપઙ્ક્તિવિરાજિતઃ ।
ઝઙ્કારિમધુપવ્રાતગાનનાદવિનાદિતઃ ॥ ૧૦૩॥

ઞવર્ણકૃતસંહારદૈત્યાસૃક્પર્ણમુદ્ગરઃ ।
ટકારશ્ચ ફલાસ્વાદી વેપિતાશેષમૂર્ધજઃ ॥ ૧૦૪॥

તામ્રસિન્દૂરપૂજાઢ્યો લલાટફલકચ્છવિઃ ।
થકારધનપઙ્ક્ત્યાઢ્યઃ સન્તોષિતદ્વિજવ્રજઃ ॥ ૧૦૫॥

દયામૃતહૃદમ્ભોજધૃતત્રૈલોક્યમણ્ડલઃ ।
ધનદાદિમહાયક્ષસંસેવિતપદામ્બુજઃ ॥ ૧૦૬॥

નમિતાશેષદેવૌઘકિરીટમણિરઞ્જિતઃ ।
પરવર્ગાપવર્ગાદિભોગચ્છેદનદક્ષકઃ ॥ ૧૦૭॥

ફણિચક્રસમાકરાન્તમલ્લમણ્ડલમણ્ડિતઃ ।
બદ્ધભ્રૂયુગભીમોગ્રસંતર્જિતસુરાસુરઃ ॥ ૧૦૮॥

ભવાનીહૃદયાનન્દવર્દ્ધનૈકનિશાકરઃ ।
મદિરાકલશપ્રીતઃ કરાલૈકકરામ્બુજઃ ॥ ૧૦૯॥

યજ્ઞાન્તરાયસઙ્ઘાતસજ્જીકૃતવરાયુધઃ ।
રત્નાકરસુતાક્રાન્તકાન્તિકીર્તિવિવર્ધનઃ ॥ ૧૧૦॥

લમ્બોદરમહાભીમવપુર્દીપ્કૃતાસુરઃ ।
વરુણાદિદિગીશાનામર્ચિતાર્ચનચર્ચિતઃ ॥ ૧૧૧॥

શઙ્કરૈકપ્રિયઃ પ્રેમનયનાનન્દવર્દ્ધનઃ ।
ષોડશસ્વરતાલાપગીતગાનવિચક્ષણઃ ॥ ૧૧૨॥

સમદુર્ગસરિન્નાથસ્તારણાર્કોડુપોહરઃ ।
બ્રહ્મવૈકુણ્ઠબ્રહ્મજ્ઞસંરક્ષિતતનૂચરઃ ॥ ૧૧૩॥

તારાઙ્કુમન્ત્રવર્ણૈકવિગ્રહોજ્જ્વલવિગ્રહઃ ।
અકારાદિક્ષકારાન્તવિદ્યાભૂષિતવિગ્રહઃ ॥ ૧૧૪॥

ૐ શ્રીવિનાયકો ૐ હ્રીં વિઘ્નાધ્યક્ષો ગણાધિપઃ ।
હેરમ્બો મોદકાહારો વક્રતુણ્ડો વિધિઃ સ્મૃતઃ ॥ ૧૧૫॥

વેદાન્તગીતો વિદ્યાર્થિસિદ્ધમન્ત્રઃ ષડક્ષરઃ ।
ગણેશો વરદો દેવો દ્વાદશાક્ષરમન્ત્રિતઃ ॥ ૧૧૬॥

સપ્તકોટિમહામન્ત્રમન્ત્રિતાશેષવિગ્રહઃ ।
ગાઙ્ગેયો ગણસેવ્યક્ષ ૐ શ્રીદ્વૈમાતુરઃ શિવઃ ॥ ૧૧૭॥

ૐ હ્રીં શ્રીં ક્લીં ગ્લૌં ગં દેવો મહાગણપતિઃ પ્રભુઃ ।

ઇદં નામસહસ્રં તે મહાગણપતેઃ સ્મૃતમ્ ॥ ૧૧૮॥

ગુહ્યં ગોપ્યતમં સિદ્ધં સર્વતન્ત્રેષુ ગોપિતમ્ ।
સર્વમન્ત્રમયં દિવ્યં સર્વમન્ત્રવિનાયકમ્ ॥ ૧૧૯॥

ગ્રહતારામયં રાશિવર્ણપઙ્ક્તિસમન્વિતમ્ ।
સર્વવિદ્યામયં બ્રહ્મસાધનં સાધકપ્રિયમ્ ॥ ૧૨૦॥

ગણેશસ્ય ચ સર્વસ્વં રહસ્યં ત્રિદિવૌકસામ્ ।
યથેષ્ટફલદં લોકે મનોરથપ્રપૂરણમ્ ॥ ૧૨૧॥

અષ્ટસિદ્ધિમયં શ્રેષ્ઠં સાધકાનાં જયપ્રદમ્ ।
વિનાર્ચનં બિના હોમં વિના ન્યાસં વિના જપમ્ ॥ ૧૨૨॥

અણિમાદ્યષ્ટસિદ્ધીનાં સાધનં સ્મૃતિમાત્રતઃ ।
ચતુર્થ્યામર્ધરાત્રે તુ પઠેન્મન્ત્રી ચતુષ્પથે ॥ ૧૨૩॥

લિખેદ્ભૂર્જે મહાદેવિ પુણ્યં નામસહસ્રકમ્ ।
ધારયેત્તં ચતુર્દશ્યાં મધ્યાહ્ને મૂર્ધ્નિ વા ભુજે ॥ ૧૨૪॥

યોષિદ્વામકરે ચૈવ પુરુષો દક્ષિણે ભુજે ।
સ્તમ્ભયેદપિ બ્રહ્માણં મોહયેદપિ શઙ્કરમ્ ॥ ૧૨૫॥

વશયેદપિ ત્રૈલોક્યં મારયેદખિલાન્રિપૂન્ ।
ઉચ્ચાટયેચ્ચ ગીર્વાણં શમયેચ્ચ ધનઞ્જયમ્ ॥ ૧૨૬॥

વન્ધ્યા પુત્રં લભેચ્છીઘ્રં નિર્ધનો ધનમાપ્નુયાત્ ।
ત્રિવારં યઃ પઠેદ્રાત્રૌ ગણેશસ્ય પુરઃ શિવે ॥ ૧૨૭॥

નક્તં શક્તિયુતો દેવિ ભુક્ત્વા ભોગાન્યથેપ્સિતાન્ ।
પ્રત્યક્ષવરદં પશ્યેદ્ગણેશં સાધકોત્તમઃ ॥ ૧૨૮॥

પરાહ્ને પઠ્યતે નામ્નાં સહસ્રં ભક્તિપૂર્વકમ્ ।
તસ્ય વિત્તાદિવિભવો દારાયુઃસમ્પદઃ સદા ॥ ૧૨૯॥

રણે રાજભયે દ્યૂતે પઠેન્નામસહસ્રકમ્ ।
સર્વત્ર જયમાપ્નોતિ ગણેશસ્ય પ્રસાદતઃ ॥ ૧૩૦॥

ઇતીદં પુણ્યસર્વસ્વં મન્ત્રનામસહસ્રકમ્ ।
મહાગણપતેઃ પુણ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૧૩૧॥

॥ ઇતિ શ્રીરુદ્રયામલતન્ત્રે ઉચ્છિષ્ટગણેશસહસ્રનામસ્તોત્રં સમાપ્તમ્ ॥

Notes:

Readers′ discretion is required.

Two versions of UcchiṣṭaGaṇapatiSahasranāmastotram ઉચ્છિષ્ટગણપતિસહસ્રનામસ્તોત્રમ્ have been found and both seem to be an adaptation from the MahāGaṇapatiSahasranāmastotram (RudrayāmalaTantre DevīRahasye) મહાગણપતિસહસ્રનામસ્તોત્રમ્ (રુદ્રયામલતન્ત્રે દેવીરહસ્યે). One of these is found in MantraMahārṇavaḥ મન્ત્રમહાર્ણવઃ and the other is found as the 4th part of the UcchiṣṭaGaṇapatiPañcāṅgam ઉચ્છિષ્ટગણપતિપઞ્ચાઙ્ગમ્ a.k.a. the UcchiṣṭaGaṇapatiPañcaratnam ઉચ્છિષ્ટગણપતિપઞ્ચરત્નમ્.

MahāGaṇapatiSahasranāmastotram (RudrayāmalaTantre DevīRahasye) મહાગણપતિસહસ્રનામસ્તોત્રમ્ (રુદ્રયામલતન્ત્રે દેવીરહસ્યે) comprises of 1000 names of MahāGaṇapati મહાગણપતિ that include His names pertaining to Graha ગ્રહ, Tithi તિથિ, Nakṣatra નક્ષત્ર, Akśaramāla અક્ષરમાલા etc. and a similar pattern is found to be replicated in the two versions of UcchiṣṭaGaṇapatiSahasranāmastotram ઉચ્છિષ્ટગણપતિસહસ્રનામસ્તોત્રમ્. Both of these Stotrams are addressed to MahāGaṇapati મહાગણપતિ with difference of main name indicated only in the Devyuvāca દેવ્યુવાચ and viniyogaḥ વિનિયોગઃ.

MahāGaṇapatiSahasranāmastotram મહાગણપતિસહસ્રનામસ્તોત્રમ્ is a longer version compared to either version of the UcchiṣṭaGaṇapatiSahasranāmastotram ઉચ્છિષ્ટગણપતિસહસ્રનામસ્તોત્રમ્; and is found in RudrayāmaloktaDeviRahasyam રુદ્રયાલમોક્તદેવીરહસ્યમ્. It is also called VaradaGaṇeśaSahasranāmaStotram વરદગણેશસહસ્રનામસ્તોત્રમ્ per the viniyogaḥ વિનિયોગઃ and can be accessed from the respective link given below.

Core Content of the MahāGaṇapatiSahasranāmastotram મહાગણપતિસહસ્રનામસ્તોત્રમ્ and the two versions of UcchiṣṭaGaṇapatiSahasranāmastotram ઉચ્છિષ્ટગણપતિસહસ્રનામસ્તોત્રમ્; both attributed to be from the Rudrayāmalam રુદ્રયામલમ્, is quite similar wrt many names but the number of shlokas differ amongst the two with either version of the UcchiṣṭaGaṇapatiSahasranāmastotram ઉચ્છિષ્ટગણપતિસહસ્રનામસ્તોત્રમ્ having substantially fewer number of names (<750) than the expected 1000.

Gaṇapati Bīja ગણપતિ બીજ used in this version is Gaṃ ગં, whereas the other version has it as Gam̐ ગઁ.

Encoded and proofread by Ruma Dewan

---

*Uchchishtaganesha Sahasranamastotram 2*

pdf was typeset on October 16, 2025

Please send corrections to *sanskrit@cheerful.com*